# Panchmukhi Hanuman kavach Mantra In Hindi PDF Download



## (Panchmukhi Hanuman kavach Mantra Lyrics Pdf)

**Panch mukhi Hanuman kavach Mantra in Hindi Lyrics Pdf**

Read **Panchmukhi Hanuman kavach mantra in Hindi**

lyrics–.

**ॐ श्री पंचवदनायांजनेयाय नमः। ॐ अस्य श्री पंचमुखहनुमत्कवचमन्त्रस्य ब्रह्मा ऋषिः, गायत्रीछन्दः,पंचमुखविराट्हनुमान् देवता, ह्रीं बीजं, श्रीं शक्ति, क्रौं कीलकं, क्रूं कवचं, क्रैं अस्त्राय फट् इति दिग्बन्धः ॥**

**श्री गरुड उवाचः**

**अथ ध्यानं प्रवक्ष्यामि श्रृणुसर्वांगसुन्दरि ।**

**यत्कृतं देवदेवेन ध्यानं हनुमतः प्रियम् ॥1॥**

**पंचवक्त्रं महाभीमं त्रिपंचनयनैर्युतम् ।**

**बाहुभिर्दशभिर्युक्तं सर्वकामार्थसिद्धिदम् ॥2॥**

**पूर्वंतु वानरं वक्त्रं कोटिसूर्यसमप्रभम् ।**

**दंष्ट्राकरालवदनं भृकुटीकुटिलेक्षणम् ॥3॥**

**अस्यैव दक्षिणं वक्त्रं नारसिंहं महाद्भुतम् ।**

**अत्युग्रतेजोवपुषं भीषणं भयनाशनम् ॥4॥**

**पश्चिमं गारुडं वक्त्रं वक्रतुंडं महाबलम्॥**

**सर्वनागप्रशमनं विषभूतादिकृन्तनम् ॥5॥**



Visit www.shrihanumanchalisa.in Download PDF related ton hindu stotra , mantra, bhajan, lyrics etc.

उत्तरं सौकरं वक्त्रं कृष्णं दीप्तं नभोपमम् ।

पातालसिंहवेतालज्वररोगादिकृन्तनम् ॥6॥

ऊर्ध्वं हयाननं घोरं दानवांतकरं परम ।

येन वक्त्रेण विप्रेंद्र तारकाख्यं महासुरम् ॥7॥

जघान शरणं तत्स्यात्सर्वशत्रुहरं परम् ।

ध्यात्वा पंचमुखं रुद्रं हनुमन्तं दयानिधिम् ॥8॥

खंग त्रिशूलं खट्वांगं पाशमंकुशपर्वतम् ।

मुष्टिं कौमोदकीं वृक्षं धारयन्तं कमण्डलुम् ॥9॥

भिन्दिपालं ज्ञानमुद्रां दशभिर्मुनिपुंगवम् ।

एतान्यायुधजालानि धारयन्तं भजाम्यहम् ॥10॥

प्रेतासनोपविष्टं तं सर्वाभरणभूषितम् ।

दिव्यमाल्याम्बरघर दिव्यगन्धानुलेपनम् ॥11॥

सर्वाश्चर्यमय देव हनुमद्विश्वतोमुखम् ।

पश्चास्यमच्युतम नेकविचित्रवर्णं वक्त्रं

शशांकशिखरं कपिराजवयम ।

पीतांबरादिमुकुटैरूपशोभितांग

पिंगाक्षमाद्यमनिशं मनसा स्मरामि ॥12॥

मर्कटेशं महोत्साहं सर्वशत्रुहरं परम् ।

शत्रु संहर मां रक्ष श्रीमन्नापदमुद्धर ॥13॥

ॐ हरिमर्कट मर्कट मन्त्रमिदं



Visit www.shrihanumanchalisa.in Download PDF related ton hindu stotra , mantra, bhajan, lyrics etc.

परिलिख्यति लिख्यति वामतले ।

यदि नश्यति नश्यति शत्रुकुलं

यदि मुश्चति मुश्चति वामलता ॥14॥

ॐ हरिमर्कटाय स्वाहा ।
ॐ नमो भगवते पंचवदनाय पूर्वकपिमुखाय सकलशत्रुसंहारणाय स्वाहा ।
ॐ नमो भगवते पंचवदनाय दक्षिणमुखाय करालवदनाय नरसिंहाय सकलभूतप्रमथनाय स्वाहा ।
ॐ नमो भगवते पंचवदनाय पश्चिममुखाय गुरुडाननाय सकलविषहराय स्वाहा ।
ॐ नमो भगवते पंचवदनायोत्तरमुखायादिवराहाय सकलसम्पत्कराय स्वाहा ।
ॐ नमो भगवते पंचवदनायोर्ध्वमुखाय हयग्रीवाय सकलजनवशंकराय स्वाहा ।

ॐ अस्य श्री पंचमुखहनुमन्मंत्रस्य श्रीरामचन्द्र ऋषिः अनुष्टुप्छन्दः, पंचमुखवीरहनुमान् देवता, हनुमानिति बीजम्, वायुपुत्र इति शक्तिः, अंजनीसुत इति कीलकम्, श्रीरामदूतहनुमत्प्रसादसिद्धयर्थे जपे विनियोगः । इति ऋष्यादिकं विन्यस्य ।

ॐ अंजनीसुताय अंगुष्ठाभ्यां नमः ।
ॐ रुद्रमूर्तये तर्जनीभ्यां नमः ।
ॐ वायुपुत्राय मध्माभ्यां नमः ।
ॐ अग्निगर्भाय अनामिकाभ्यां नमः ।
ॐ रामदूताय कनिष्ठिकाभ्यां नमः ।
ॐ पंचमुखहनुमते करतलकरपृष्ठाभ्यां नमः ।
इति करन्यासः ।

ॐ अंजनीसुताय हृदयाय नमः ।
ॐ रुद्रमूर्तये शिरसे स्वाहा ।
ॐ वायुपुत्राय शिखायै वंषट् ।
ॐ अग्निगर्भाय कवचाय हुं ।
ॐ रामदूताय नेत्रत्रयाय वौषट् ।
ॐ पंचमुखहनुमते अस्राय फट् ।
पंचमुखहनुमते स्वाहा ।
इति दिग्बन्धः ।

## अथ ध्यानम्:



Visit www.shrihanumanchalisa.in Download PDF related ton hindu stotra , mantra, bhajan, lyrics etc.

वन्दे वानरनारसिहखगराट्क्रोडाश्ववक्रान्वितं दिव्यालंकरणं त्रिपश्चनयनं दैदीप्यमानं रुचा ।
हस्ताब्जैरसिखेटपुस्तकसुधाकुम्भांकुशादि हलं खटांगं फणिभूरुहं दशभुजं सर्वारिवीरापहम् ॥1॥
इति ॥

अथ मंत्रः

ॐ श्रीरामदूतायांजनेयाय वायुपुत्राय महाबलपराक्रमाय सीतादुःखनिवारणाय लंकादहनकारणाय महाबलप्रचण्डाय फाल्गुनसखाय कोलाहलसकल ब्रह्माण्डविश्वरूपाय सप्तसमुद्रनिर्लंघनाय पिंगलनयनायामितविक्रमाय सूर्यबिम्बफलसेवनाय दुष्टनिवारणाय दृष्टिनिरालंकृताय संजीविनीसंजीवितांगदलक्ष्मणमहाकपिसैन्यप्राणदाय दशकण्ठविध्वंसनाय रामेष्टाय महाफाल्गुनसखाय सीतासहित रामवरप्रदाय षट्प्रयोगागम पंचमुखवीरहनुमन्मंत्रजपे विनियोगः ।
ॐ हरिमर्कटमर्कटाय बंबंबंबंबं वौषट् स्वाहा ।

ॐ हरिमर्कटमर्कटाय फंफंफंफंफं फट् स्वाहा ।
ॐ हरिमर्कटमर्कटाय खेंखेंखेंखेंखें मारणाय स्वाहा ।
ॐ हरिमर्कटमर्कटाय लुंलुंलुंलुंलुं आकर्षितसकलसम्पत्कराय स्वाहा ।
ॐ हरिमर्कटमर्कटाय धंधंधंधंधं शत्रुस्तम्भनाय स्वाहा ।ॐ टंटंटंटंटं कूर्ममूर्तये पंचमुखवीरहनुमते परयन्त्रपरतंत्रोच्चाटनाय स्वाहा ।
ॐ कंखंगंघंडं चंछंजंझंञं टंठंडंढंणं तंथंदंधंनं पंफंबंभंमं यंरंलंवं शंषंसंहं ळं क्ष स्वाहा। इति दिग्बंधः ।
ॐ पूर्वकपिमुखाय पंचमुखहनुमते टंटंटंटंटं सकलशत्रुसंहरणाय स्वाहा ।
ॐ दक्षिणमुखाय पंचमुखहनुमते करालवदनाय नरसिहाय ।ॐ ह्रां ह्रीं हुं हैं ह्रौं ह्रः सकलभूतप्रेतदमनाय स्वाहा ।
ॐ पश्चिममुखाय गरुडाननाय पंचमुखहनुमते मंमंमंमंमं सकलविषहराय स्वाहा ।
ॐ उत्तरमुखायादिवराहाय लंलंलंलंलं नृसिंहाय नीलकण्ठमूर्तये पंचमुखहनुमतये स्वाहा ।
ॐ उर्ध्वमुखाय हयग्रीवाय रुंरुंरुंरुंरुं रुद्रमूर्तये सकलप्रयोजननिर्वाहकाय स्वाहा ।ॐ अंजनीसुताय वायुपुत्राय महाबलाय सीताशोकनिवारणाय श्रीरामचंद्रकृपापादुकाय महावीर्यप्रमथनाय ब्रह्माण्डनाथाय कामदाय पंचमुखवीरहनुमते स्वाहा ।
भूतप्रेतपिशाचब्रह्मराक्षसशाकिनीडाकिन्यन्तरिक्षग्रह परयंत्रपरतंत्रोच्चटनाय स्वाहा ।
सकलप्रयोजननिर्वाहकाय पंचमुखवीरहनुमते श्रीरामचन्द्रवरप्रसादाय जंजंजंजंजं स्वाहा ।

इदं कवचं पठित्वा तु महाकवच पठेन्नरः ।

एकवारं जपेत्स्तोत्रं सर्वशत्रुनिवारणम् ॥15॥

द्विवारं तु पठेन्नित्यं पुत्रपौत्रप्रवर्धनम् ।

त्रिवारं च पठेन्नित्यं सर्वसम्पतकरं शुभम् ॥16॥


Visit www.shrihanumanchalisa.in Download PDF related ton hindu stotra , mantra, bhajan, lyrics etc.

चतुर्वारं पठेन्नित्यं सर्वरोगनिवारणम् ।

पंचवारं पठेन्नित्यं सर्वलोकवशंकरम् ॥17॥

षड्वारं च पठेन्नित्यं सर्वदेववशंकरम् ।

सप्तवारं पठेन्नित्यं सर्वसौभाग्यदायकम् ॥18॥

अष्टवारं पठेन्नित्यं मिष्टकामार्थसिद्धिदम् ।

नववारं पठेन्नित्यं राजभोगमवाप्नुनात् ॥19॥

दशवारं पठेन्नित्यं त्रैलोक्यज्ञानदर्शनम् ।

रुद्रावृत्तिं पठेन्नित्यं सर्वसिद्धिर्भवेद्‌ध्रुवम् ॥20॥

कवचस्मतरणेनैव महाबलमवाप्नुयात् ॥21॥

॥ सुदर्शनसंहितायां श्रीरामचन्द्रसीताप्रोक्तं श्री पंचमुखहनुमत्कवचं संपूर्ण ॥

|| जय श्री राम ||

हनुमान जी की महिमा को आगे शेयर करें

**Thanks.**
**To read**

Hanuman Bahuk in hindi lyrics download pdf



Visit www.shrihanumanchalisa.in Download PDF related ton hindu stotra , mantra, bhajan, lyrics etc.